# Vishnuprokta Shivabhaktiyachana

# વિષ્ણુપ્રોક્તા શિવભક્તિયાચના

## Document Information

Text title : Vishnuprokta Shivabhaktiyachana

File name : viShNuproktAshivabhaktiyAchanA.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 11 | 573-583||

Latest update : March 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2024

*sanskritdocuments.org*

# વિષ્ણુપ્રોક્તા શિવભક્તિયાચના

વિષ્ણુરુવાચ -
વરોત્તમં વરં દેહિ વરદોત્તમ શઙ્કર ।
અચઞ્ચલા શિવે ભક્તિર્મમાસ્ત્વિતિ પુનઃ પુનઃ ॥ ૫૭૩॥

અક્ષમેણ મયા દેવ સ્વલ્પમેવ તપઃ કૃતમ્ ।
પ્રસન્નોઽસિ કથં શમ્ભો કરુણાકર શઙ્કર ॥ ૫૭૪॥

દીનબન્ધો દયાસિન્ધો પ્રસન્નોઽસિ કથં મમ ।
મયા પૂજાવિધિઃ સમ્યક્ તવ ન જ્ઞાયતે શિવ ॥ ૫૭૫॥

તવ સ્વરૂપં ન જ્ઞાતં તત્ત્વતોઽમેયવિક્રમ ।
તાદૃશસ્ય મમાદ્ય ત્વં પ્રસન્નઃ કથમીશ્વરઃ ॥ ૫૭૬॥

વેદૈરપિ ન તે તત્ત્વં જ્ઞાતમસ્તિ મહેશ્વર ।
તાદૃશં શિવતત્ત્વં તે કથં જ્ઞેયં મયાધુના ॥ ૪૭૭॥

ત્વદન્યઃ કરુણાસિન્ધુર્લોકે નાસ્ત્યેવ સર્વથા ।
યદલ્પેનાપિ તપસા પ્રીતોઽસિ ભગવન્શિવ ॥ ૫૭૮॥

ત્વદન્યચ્છરણં નાસ્તિ ત્વમેવ શરણં મમ ।
રક્ષ રક્ષ મહાદેવ રક્ષ રક્ષ શિવાપતે ॥ ૫૭૯॥

ત્વદીયં પાદકમલં નિધેહિ મમ મૂર્ધનિ ।
યેન ધન્યો ભવામ્યદ્ય ધન્યં માં કુરુ શઙ્કર ॥ ૫૮૦॥

ત્વદીયં પાદકમલં દૃઢં બદ્ધં મયા શિવ ।
ધન્યોઽસ્મિ કૃતકૃત્યોઽસ્મિ મત્તો ધન્યો ન વિદ્યતે ॥ ૫૮૧॥

યન્ન વેદપુરાણાદ્યૈર્દૃષ્ટંયત્પાદ પઙ્કજમ્ ।
તદેવાદ્ય મયા દૃષ્ટં ભાગ્યસ્યાન્તો ન મે શિવ ॥ ૫૮૨॥

યન્ન સિદ્ધૈર્મુનિવરૈઃ કપિલાદ્યૈર્નિરીક્ષિતમ્ ।

તાદૃશં શઙ્કરસ્યૈતદ્ દૃષ્ટં પાદામ્બુજં મયા ॥ ૫૮૩॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે વિષ્ણુપ્રોક્તા શિવભક્તિયાચના સમ્પૂર્ણા ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૧૧ । ૫૭૩-૫૮૩॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 11 . 573-583..

Proofread by Ruma Dewan

---

*Vishnuprokta Shivabhaktiyachana*

pdf was typeset on March 8, 2024

Please send corrections to *sanskrit@cheerful.com*